**विक्रोक** पु० इक्ष्वाकुपुत्रभेदे कल्किन० २१अध्याये दृश्यम् ।

**विक्क** पु० विक्कणति वि+कण–ड । करिशावके त्रिका० ।

**विक्रम** पु० विशेषेण क्रामति वि+क्रम-अच् । १वि-विक्रमे, २विष्णौ, "मेधावी विक्रमः क्रमः" विष्णुस० । ३विक्रमादित्यनृपे "रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदाभरणम् । भावे घञ् । ४क्रमणे मेदि० । करणे घञ् । ५चरणे, त्रिविक्रमः । ६शौर्य्यातिशये, ७सामर्थ्ये च राजनि० । षष्टिवर्षमध्ये "लवणं मधु गन्धश्च महार्घं विक्रमे प्रिये !" इत्युक्तलक्षणे वत्सरभेदे मेदि० । प्रभवादिशब्दे ४४७४ पृ० दृश्यम् ।

**विक्रमादित्य** पु० विक्रमेणादित्य इव । स्वनामख्याते नृपभेदे विक्रमार्कोऽप्यत्र "नो दृष्टः श्रुत एव वा क्षितितले श्रीविक्रमार्कोपमः" मिता० ।

**विक्रमिन्** पु० वि+क्रम-णिनि । १सिंहे, राजनि० २विष्णौ विष्णुपु० । ३विक्रमयुक्ते त्रि० स्त्रियां ङीप् ।

**विक्रय** पु० वि+क्री-अच् । मूल्यग्रहणेन परस्वत्वापादके व्यापारे अमरः ।

विक्रये विहिताविहितनक्षत्राणि यथा "यमाहिशक्राग्निकृत्ताशपूर्वा नेष्टाः क्रये विक्रयणे प्रशस्ताः । पौष्णाश्विचित्राशतविन्दुवाताः क्रये हिता विक्रयणे निषिद्धाः" । ज्योतिःसारः । क्रयविक्रयनिर्णयो यथा "मूल्यं दास्यामीति नियमं कृत्वा ग्रहणादपि क्रयसिद्धिः । तथाच विवादचिन्तामणौ कात्यायनः "पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् । ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात्" । अतएव वृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् । पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते" । क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः । यथाह मनुः "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् । सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा" । एतद्याज्ञवल्क्योक्तेतरपरम् । यथा याज्ञवल्क्यः "दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् । वीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं । अत्र वृहस्पतिः "अतोऽर्वाक् पण्यदोषस्तु यदि संजायते क्वचित् । विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्" । अतस्तद्द्रव्यपरीक्षणकालात् । कात्यायनः "अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम् । क्रेता तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु" । काले प्रागुक्तपरीक्षाकालाभ्यन्तरे । परीक्षिते तु वृहस्पतिः "परीक्षेत स्वयं पण्यं अन्येषाञ्च प्रदर्शयेत् । परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्" । अत्र विशेषयति नारदः "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतम् । द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत् । द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत्" । आहरेत् दद्यात् विक्रेत्रे इति शेषः । द्विगुणं त्रिंशांशस्य । याज्ञवल्क्यः "राजदैवोपघातेन पण्ये दोषमुपागते । हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः" । नारदः "उपहन्येत वा पण्यं दह्येतापह्रियेत वा । विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः । दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी । स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" प्राय० त० । "न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च । विक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा" । न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति । विक्रयपदं सम्बन्धसकत्वात् दानं लक्षयति तत्र परा क्रिया सिद्धेत्यर्थः । एवञ्च विक्रेतृदात्रोर्मरणादिना आध्यनुद्धारे विक्रयदाने तत्कर्त्तृतुल्यस्वत्वजननात् तत्र तत्क्रेतृप्रतिग्रहीतृभ्यामाध्युद्धारः कार्य्यः इति । न च "स्थावरस्य समस्तस्य गोत्रसाधारणस्य च । नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना । विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये" इति व्यासवचनाभ्यामेकस्य दानबन्धकविक्रयानधिकारः इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवात्राप्यविशेषात् वचनञ्च स्वामित्वेन दुष्टत्वपुरुषगोचरविक्रयादिना कुटुम्बविरोधादधर्मज्ञापनार्थनिषेधकं न तु विक्रयाद्यनिष्पत्त्यर्थमिति" दायभागः । एवञ्च "स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया" इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं "भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति" विज्ञानेश्वरः । वस्तुतस्तु स्थावरविक्रयनिषेधः अविभक्तस्थावरविषयः । तत्रापि यदि विक्रयं विना अवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः । पूर्वपुरुषार्जितनष्टोद्धारे विशेषयति मिताक्षरायाम् "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम् । असम्भूय सुतान् सर्वान् न दानं न च विक्रयः" इ-